No. ५६४१

Title श्रीगणेश स्तोत्रम

Author

Extent ५ संवत १९५४

Subject तन्त्रम संपूर्णम

१३२ १३२ नं. २२२

5641

FL 5

श्रीगणेशस्तोत्रम (तन्त्रम)
पत्राणि ५ (पञ्चे) (संपूर्णम)
संवत १६५४

Complete

ग॰ ॐश्रीगणेशायनमः अथगणेशस्तोत्रम्
स्तो॰ ॐकारमाद्यंप्रवदंतिसंतो वाचःश्रुतीना
१ मपियंगृणंति गजाननंदेवगणानता
ङ्घ्रिं भजेहमर्धेंदुकृतावतंसं १ पादारविं
दार्चनतत्पराणां संसारदावानलभंगद
क्षम् निरंतरंनिर्गतदानतोयै स्तंनौमिवि
घ्नेश्वरमंबुदाभम् २ कृतांगरागंनवकुं

क्रमेन मत्तालिमालां मदपंकलग्नाम् नि
वारयंतं निजकर्णतालैः कोस्मरेत्पुत्रमनं
गशत्रोः ३ शंभोजटाजूटनिवासिगंगा-
जलंसमानीयकरांबुजेन लीलाभिरारा-
च्छिवमर्चयंतं गजाननंभक्तियुताभजंति ४
कुमारमुक्तौपुनरात्महेतोः पयोधरौपर्वत
राजपुत्र्याः प्रक्षालयंतंकरशीकरेण मुग्धा

ग॰ ननंनागमुखंभजामि ५ त्वयासमुद्धृत्य
स्तो॰ गजास्यहस्तं येशीकराःपुष्कररंध्रमुक्ताः
२ व्योमांगनेतेविचरंतितारा: कलात्मनोमु
2 क्तिकतुल्यभासः ६ क्रीडारतेवानिधौग
जास्ये वेलामतिक्रामतिवारिपूरे कल्पा
वसानंभ्रविचिंत्यदेवाः कैलासनाथंस्तुति
भिःस्तुवंति ७ नागाननेनागकृतोत्तरीये-

क्रीडारते देवकुमारमुख्यैः त्वयि क्षणं काल
गतिं विहाय तौ प्रापतुः कंदुकनामिनेंदू ॥
मदोल्लसत्यं च मुखैरजस्रं मध्यापयंतं सक
लागमार्थान् देवान्ऋषीन्भक्तजनैकमित्रं
हेरंबमर्कारुणमाश्रयामि ॥ पादाम्बुजा-
भ्यामतिवामनाभ्यां कृतार्थयंतं कृपया धा
रित्रीं अकारणं कारणमाप्तवाचां तं नागवक्त्रं

गा॰ नजहातिचेतः ९ येनार्पितंसत्यवतीसुता
स्तो॰ य पुराणमालिख्यविषाणकोट्या तंचंद्र-
२ मौलेस्तनयंतपोभि रवाप्यमानंद्घनंभजामि
3 ।। पदंश्रुतीनामपदंस्तुतीनां लीलावतारंपर
मष्टमूर्तै नागात्मकोवापुरुषात्मकोवे त्यभे
द्यमाद्यंभजविघ्नराजम् १ पाशांकुशौभग्नरदं
तुमीष्टं कौरैर्दधानंकररंध्रमुक्तैः मुक्ताफला

मैः पृथुशीकरौघै स्सिंचंतमंगं शिवयोर्भजा
मि ॥३॥ अनेकमेकं गजमेकदंतं चैतन्यरू
पं जगदादिवीजं ब्रह्मेतियंवेदविदोवदंति तं
शंभुसूनुं शरणं भजामि ॥४॥ स्वांकस्थिताया
निजवल्लभाया मुखांबुजालोकनलोलनेत्रं
स्मेराननाब्जं मदवैभवेन भद्रं भजे विश्वावि
मोहनं तम् ॥५॥ येपूर्वमाराध्य गजाननं त्वां

ग॰ सर्वार्थशास्त्राणिपठंतितेषांम् त्वन्नोनचान्य
स्तो॰ त्प्रतिपाद्यमेतन्न दास्तितत्सत्यमसत्यकल्पम्
४ १६ हिरण्यगर्भंजगदीशितारं कविंपुराणंरवि
५ मंडलस्थं गजाननंयंप्रवदंतिसंत स्तत्का-
लयोगैस्तमहंप्रपद्ये १७ वेदांतगीतंपुरुषं
भजेह मात्मानमानंदघनंहृदिस्थं गजान
नंयन्महसाजनानां विघ्नांधकारंविलयंप्र

याति ८ शंभोः समालोक्यजटाकलापे शा
शांकखंडं निजपुष्करेण स्वभग्नदंतं प्रविचिं-
त्यमौग्ध्या दाकृष्टुकामः शिवमातनोतु ९
विघ्नार्गलानां विनिपातनार्थं यन्नारिकेलैः क
दलीफलाद्यैः प्रवादयंतं मदवारणास्यं प्रा
पुर्नरोभीष्टमहं भजेतम् यत्तैरनेकैर्बहुभि
स्तपोभिराराध्यमाद्यं गजराजवक्त्रम् स्तुत्या

ग॰ नयायेविधिनाप्लुवंति तेसर्वेलक्ष्मीनिधयो
स्तो॰ भवंति २१ इतिश्रीगणेशस्तोत्रंसंपूर्णम् ॥
५ शुभम् श्री श्री श्री श्री श्री ॥

सं॰ १९५८ श्रावणे मासि लिखितं जम्बूनगरे

5



नं. २३२